## ग्रहण-स्नान-लघुसङ्कल्पः (When Grahana occurs for Short duration)

आचमनम् । शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं । प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥ प्राणायामः । स्वल्पकाल–ग्रहणे लघु–सङ्कल्पः – ममोपात्त–समस्त–दुरित–क्षय–द्वारा श्रीपरमेश्वर–प्रीत्यर्थं भारत–वर्षे भरतखण्डे (______नद्याः तीरे/_______पुण्यतीर्थे) शुभकृत्–नाम संवत्सरे दक्षिणायने शरद्दतौ सौरमानेन तुलामासे चान्द्रमानेन कार्तिक मासे शुक्ल–पक्षे पूर्णिमायां शुभतिथौ भौमवासरयुक्तायां भरणी–नक्षत्र–युक्तायां व्यतीपातयोगयुक्तायां बव–करणयुक्तायाम् एवं–गुणविशेषण–विशिष्टायाम् अस्याम् पूर्णिमायां शुभतिथौ–राहुग्रस्त चन्द्रोपरागपुण्यकाले पुण्यस्नानम् अहं करिष्ये ।

## ग्रहण-स्नान-महा–सङ्कल्पः (When Grahana occurs for long duration)

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपतेतेंघ्रियुगं स्मरामि ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतो पि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

मानसं वाचिकं पापं कर्मणा समुपार्जितम् ।
श्रीरामस्मरणेनैव व्यपोहति न संशयः ॥ श्रीराम राम राम ।

तिथिर्विष्णुस्तथा वारो नक्षत्रं विष्णुरेव च ।
योगश्च करणं चैव सर्वं विष्णुमयं जगत् ॥ श्री गोविन्द गोविन्द गोविन्द ।

ममोपात्त–समस्त–दुरित–क्षय–द्वारा श्रीपरमेश्वर प्रीत्यर्थम्, अस्य श्री–भगवतः महापुरुषस्य श्रीमदादिनारायणस्य अचिन्त्यया अपरिमितया शक्त्या भ्रियमाणानां महाजलौघमध्ये परिभ्रममाणानां अनेककोटिब्रह्माण्डानाम् एकतमे अव्यक्त महदहङ्कार पृथिव्यप्तेजोवाय्वाकाशाद्यावरणैः आवृते अस्मिन् महति ब्रह्माण्ड कटाहान्तरे चतुर्दश–भुवन–अन्तर्गते भू–मण्डले जम्बू प्लक्ष कुश–क्रौञ्च शाल्मलि शाक–पुष्कराख्य–सप्त–द्वीप–मध्ये जम्बूद्वीपे भारत
किम्पुरुष–हरि–इलावृत–रम्यक–हिरण्मय–कुरु–भद्राश्व–केतुमालाख्य–नव–वर्ष–मध्ये भारत–वर्षे इन्द्रद्वीपक श्वेत ताम्रपर्णि तभस्ति नाग सौम्य गन्धर्वारुण भरताख्य नवखण्डान्तर्गते अस्मिन् भरतखण्डे नानावर्ण केसराचल शिखर रत्न बीजाञ्चित भूसरोरुह कर्णिकायमानस्य मेरोः दक्षीणदिग्भागे
भागीरथी–यमुना–नर्मदा–त्रिवेणीमलापहारिणी–गौतमी–कृष्णवेणी–तुङ्गभद्रा–कावेर्यादि–अनेकपुण्यनदी–विराजिते
इन्द्रप्रस्थ–यमप्रस्थ–अवन्तिकापुरी–हस्तिनापुरी–अयोध्यापुरी–द्वारका–मथुरापुरी
मायापुरी–काशीपुरी–काञ्चीपुर्यादि–अनेकपुण्यक्षेत्रविराजिते सकल–जगत्–स्रष्टुः परार्धद्वय–जीविनः ब्रह्मणः द्वितीयपरार्धे स्वायम्भुव–स्वारोचिष–उत्तम–तामस–रैवत–चाक्षुषाख्येषु षड्डु मनुषु अतीतेषु सप्तमे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे अस्मिन् वर्तमाने व्यावहारिके प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये शुभकृत्–नाम संवत्सरे दक्षिणायने शरद्दतौ सौरमानेन तुलामासे चान्द्रमानेन कार्तिकमासे शुक्लपक्षे पूर्णिमायां शुभतिथ् भौमवासरयुक्तायां अनादि–अविद्या–वासनया प्रवर्तमाने अस्मिन् महति संसारचक्रे विचित्राभिः कर्मगतिभिः विचित्रासु योनिषु पुनः पुनः अनेकधा जनित्वा केनापि

पुण्यकर्मविशेषेण इदानीन्तन मानुष–द्विजजन्म–विशेषं प्राप्तवतः मम जन्माभ्यासात् जन्मप्रभृति एतत्–क्षण–पर्यन्तं बाल्य कौमार यौवन वार्धके च जागृत्–स्वप्न–सुषुप्ति–अवस्थासु मनो–वाक्–कायाख्य–त्रिकरणचेष्टया कर्मेन्द्रिय–ज्ञानेन्द्रिय–व्यापारैः सम्भावितानाम् इह जन्मनि जन्मान्तरे च ज्ञानाज्ञान–कृतानां महापातकानां महापातक समपातकानाम् उपपातकानां मलिनीकरणानां जातिभ्रंशकराणां विहितकर्मत्याग–निन्दितसमाचरणादीनां ज्ञानतः सकृत् कृतानाम् अज्ञानतः असकृत् कृतानां सर्वेषां पापानां सद्यः अपनोदनार्थं अस्मिन् ________ क्षेत्रे ___________ नद्याः तीरे / समस्त–देवता–सन्निधौ राहुग्रस्त चन्द्रोपराग–पुण्यकाले पुण्यस्नानम् अहं करिष्ये ॥

## ग्रहण-काल-धान्यदान-सङ्कल्पः (During donation for Dosha Parihara)

___नक्षत्रे ___राशौ जातस्य ___शर्मणः मम राहुग्रस्तखग्रास–चन्द्रोपराग–जनितपीडा– परिहारार्थं तण्डुलधान्यं स दक्षिणाक० तुभ्यमहं सम्प्रददे दत्तं न मम न मम ।

___नक्षत्रे ___राशौ जातस्य ___शर्मणः मम राहुग्रस्तखग्रास–चन्द्रोपराग–जनितपीडा– परिहारार्थं माषधान्यं सदक्षिणाकं सम्प्रददे दत्तं न मम न मम ।

## ग्रहण-काले पठितव्याः श्लोकाः (Shlokas to be chanted During Grahana)

योसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ।
सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु ॥

मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ।
चन्द्रोपरागसम्भूतामग्निपीडां व्यपोहतु ॥

यः कर्मसाक्षी जगतां धर्मो महिषवाहनः ।
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ॥

रक्षोगणाधिपः साक्षी नीलाञ्जनसमप्रभः ।
खड्गहस्तो निरृतिश्च ग्रहपीडां व्यपोहतु ॥

नागपाशधरो देवः सदा मकरवाहनः ।
स जलाधिपतिर्देवो ग्रहपीडां व्यपोहतु ॥

प्राणरूपो हि लोकानां सक्षात्कृष्णमृगप्रियः ।
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ॥

योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ।
चन्द्रोपरागकलुषं धनदो मे व्यपोहतु ॥

योऽसाविन्दुधरो देवः पिनाकी वृषवाहनः ।
चन्द्रोपरागपापानि स नाशयतु शङ्करः ॥

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्ण्वर्करुद्राश्च दहन्तु मम पातकम् ॥

## तर्पण–सङ्कल्पः

अपवित्रः पवितो वा + पुण्यतिथ् (प्राचीनावीती) गोत्राणाम् + पुण्यतिथौ चन्द्रोपराग–पुण्यकाले वर्गद्वय–पितॄन् उद्दिश्य तिल–तर्पणं करिष्ये ।

## ग्रहण-मोक्ष-स्नान–सङ्कल्पः (After the Grahana Ends)

ममोपात्त–समस्त–दुरित–क्षय–द्वारा श्रीपरमेश्वर–प्रीत्यर्थं राहुग्रहस्त–चन्द्रोपराग–मोक्ष–स्नानं करिष्ये ।

॥ शारदे पाहि मां शङ्कर रक्ष माम् ॥